एतस्य उदाहरणम् प्रागुक्तं अनानुदशब्दे दृश्यम् ।

**अनुदक** त्रि० नास्ति उदकं यत्र । "उदकशून्ये मरुदेशादौ अल्पार्थे न०त० । अल्पजले पल्वलादौ "उदन्वतीरनुदकाश्च या" इति ऋ० ७,५१,४, उदकदानविशेषशून्ये श्राद्धभेदे "पुरोडाशमात्रा अनुदका" इति कात्या० १०,५,११, । "अनुदकाः प्रत्यवनेजनपरिषेचनादि वर्जिता" इति तद्व्याख्या ।

**अनुदग्र** न उन्नतमग्रमस्य । मृदौ अतीक्ष्णे उन्नताग्रभिन्ने च नास्ति उदग्रोयस्मात् ५ब० । अत्युन्नते त्रि० ।

**अनुदर** त्रि० न उदरं यस्याल्पार्थे न०ब० । अल्पोदरशालिनि कृशोदरे, "अनुदरा कन्येति सि०कौ० स्त्रियां टाप् ।

**अनुदर्शन** अनु+दृश-ल्युट् । अनुचिन्तने, "जन्ममृत्युजराव्याधिदुःखदोषानुदर्शन"मिति गीता ।

**अनुदात्त** न० न उदात्तः विरोधे न०त० । उदात्तस्वरभिन्ने नीचैरुच्चारिते स्वरभेदे । स्वराहि त्रिविधाः उदात्तः अनुदात्तः स्वरित इति भेदात् तत्र "उच्चैरुदात्तः" "नीचैरनुदात्तः" "समाहारः स्वरित" इति च पा०। ताल्वादिषु सभागेषु स्थानेषूर्द्ध्वभागे निष्पन्नोऽजुदात्तः, तत्रैव नीचभागे निष्पन्नोऽच् अनुदात्तः । "तस्यादित उदात्तमर्द्धह्रस्वमिति" पा० । यस्यादितोऽर्द्धमुदात्तमन्त्यमनुदात्तं तादृशः स्वरः स्वरितः इति" "अनुदात्तं पदमेकवर्ज्ज"मिति"अस्यैव निघात नीचादि संज्ञा उदात्तानुदात्तत्वादिकं स्वरवर्णस्यैव न तु व्यञ्जनानां, यथोक्तम् शिक्षायाम् "उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ह्रस्वोदीर्घः प्लुतश्चेति कालतोनियमस्त्वचीति" । "प्रयत्नप्रेरितोवायुर्यदोर्द्ध्वभागे प्रतिहतोऽचं निष्पादयति स उदात्तः । एवमधोनिष्पन्नोऽनुदात्त इति" शब्देन्दु० । "उदात्तानुदात्तस्वरितानां सन्निकर्षे एकश्रुत्यम्" इति आश्व० गृह्यम् ।

**अनुदार** न० न उदारः । अतिदातृभिन्ने, अमहति च । नास्ति उदारो यस्मात् ५ब० । अतिमात्रदातरि, अति महति च । अनुगतो दारान् अत्या०स० । दारानुगते । "यस्मिन् प्रसीदसि पुनः स भवत्युदारोऽनुदारश्चेति का० प्र० । उदारत्वानुदारत्वयोरापाततो विरोधः । उदारत्वानुगतदारत्वाभ्यां तत्परिहारः ।

**अनुदित** पु० उद्+इण्+क्त ईषदर्थे न० ७ब०। किरणमालेन ईषदुदितसूर्ये प्रविरलतारके काले । "उदितेऽनुदिते चैवेति मनुः न०त०। उदितभिन्ने त्रि० । वद-क्त न०त० । अकथिते त्रि० ।

**अनुदिन** अव्य० वीप्सार्थे अव्ययी० । प्रतिदिने "पारावतः खलु शिलाकणमात्रभोगी कामी भवेदनुदिनं वद कोऽत्र हेतु"रित्युद्भटः । अनुदिवसादयोऽप्यत्र ।

**अनुदृष्टि** स्त्री अनुगता अनुकूला वा दृष्टिः प्रा०स० । अनुगतदृष्टौ, अनुकूलदृष्टौ च । ब० । तथादृष्टिमति त्रि० । तथाभूतस्त्रियाः अपत्यं कल्याण्या०ढक् इनङ् च । आनुदृष्टिनेयः तदपत्ये पुंस्त्री० । अनुदृष्टेः पुंसोऽपत्यम् शुभ्रा० ढक् । आनुदृष्टेयः तदपत्ये पुंस्त्री० ।

**अनुदेश** पु० अनु+दिश-घञ् । यथाक्रमोच्चारणे, उपदेशे च "यथासंख्यमनुदेशः समानामिति" पा० । अनुदिश्यते कर्मणि घञ् । उपदेश्ये "अनुदेशाद्याः पुरोडाशेत्यादि" कात्या० १८,६,१५ ।

**अनुद्देश** पु० न उद्देशः अभावार्थे न०त० । उद्देशाभावे ।

**अनुद्धत** त्रि० न उद्धतः विरोधे न०त० । विनययुक्ते ।

**अनुद्धरण** न० न उद्धरणम् अभावार्थे न०त० । उद्धाराभावे

**अनुद्धार** पु० न उद्धारः अभावार्थे न०त० । उद्धाराभावे । न उद्धारः विभाज्यविशेषस्योत्थापनं यत्र । विंशोद्धारशून्ये विभागे त्रि० । "अनुद्धारोविभागः स्यादिति स्मृतिः ।

**अनुद्धृत** त्रि० न उद्धृतमुत्थापितम् । अनुत्थापिते "पयोऽनुद्धृतसारञ्चेति" हविष्यविषये स्मृतिः ।

**अनुद्भट** त्रि० न उद्भटः विरोधे न०त० । अप्रगल्भे मृदौ ।

**अनुद्यम** पु० न उद्यमः अभावे न०त० । उद्यमाभावे । न० ब० । उद्यमशून्ये त्रि० ।

**अनुद्यूत** न० अनु+दिव-क्त । द्यूतस्य पश्चात् पुनर्द्यूते । तदधिकृत्य कृतग्रन्थतयोक्तमनुद्यूतपर्व सभापर्वणि दृश्यम् ।

**अनुद्योग** पु० न उद्योगः अभावे, न०त० । उद्योगाभावे ब० । उद्यमशून्ये त्रि० ।

**अनुद्रुत** त्रि० अनु+द्रु-क्त । अनुगते "धनुर्द्धरै राजकुलैरनुद्रुतमिति रघुः "अनुद्रुतः संयति येन केवलं बलस्य शत्रुः प्रशशंस शीघ्रतामिति" माघः । "अर्द्धमात्रं द्रुतं ज्ञेयं द्रुतार्द्धञ्चाप्यनुद्रुतमित्युक्ते" मात्राचतुर्थभागकाले तालभेदे न० । [न०त० । तच्छून्ये त्रि० ।

**अनुद्वाह** पु० न उद्वाहः अभावार्थे न०त० । विवाहाभावे

**अनुद्विग्न** त्रि० न उद्विग्नः विरोधे न०त० । उद्विग्नभिन्ने अव्याकुलचित्ते ।

**अनुद्वेग** पु० न उद्वेगः अभावार्थे न०त० । उद्वेगाभावे न०ब० । तच्छून्ये त्रि० "अनुद्वेगकरं वाक्यं सतां स्वाभाविकं मतमिति" नीति० ।